नं. ५०५५

शांखायन गृह्य सूत्राणि

× × ×

पत्र. २० —— सं. ×

सूत्र पद्धति:

सांख्यायनगृह्यसूत्राणि

५०५५

5055

F. = 20

४

3 and 21 MISSING

गृह्यसूत्र

॥दद्वेरामदेवगार्हपत्यस्येदंपुस्तकं॥

॥दद्वेरामदेवगार्हपत्यस्येदंपुस्तकं॥

॥दद्वेरामदेवगार्हपत्यनीपोथीगृह्यसूत्र॥

॥दद्वेरामदेवगार्हपत्यस्येदंपुस्तकं॥

॥दद्वेरामदेवगार्हपत्यस्येदंपुस्तकं॥

श्रीगणेशाय नमः ॥ ॐ ॥ अथातः पाकयज्ञान्व्याख्यास्यामो निसमावर्त्स्यमानो यत्रांत्यां समिधमभ्याद
ध्यात्तमग्निमिंधीत वैवाह्यं वा दायाद्यकाल एके प्रेते वा गृहपतौ स्वयंज्यायान्वैशाख्याममावास्याया
मन्यस्यां वा कामतो नक्षत्र एके पशुविधुलां बरीषवद्दृत्याज्ञिनामन्यतमस्मादग्निमिंधीत सा पंत्रा
तराक स्नायमाहुतिसंस्कारो ध्वर्युः इत्यय इत्याचार्याः प्रातः पूर्णाहुतिं जुहुयाद्धे हव्यवतिष्ठी वात
स्य पश्चादुपकरण हवनकालावग्निहोत्रेण व्याख्यातो यज्ञोपवीत्यादि च संभव सर्वं कि ल्पेक त्वात्तद था पौ ५
हुः । पाकसंस्था हविःसंस्थाः सोमसंस्थास्तथा पराः । एकविंशतिरित्येता यज्ञसंस्थाः प्रकीर्तिताः
॥१॥ कर्मापवर्गे ब्राह्मणभोजनं वा रूपवयःश्रुतशीलवृत्तानि गुणाः श्रुतं तु सर्वानत्येति न श्रुतम १
तीयात् । अधिदैवमथाध्यात्ममधियज्ञमिति त्रयं मंत्रेषु ब्राह्मणे चैव श्रुतमित्यभिधीयते । क्रि
यावंतमधीयानं श्रुतवृद्धं तपस्विनं । भोजयेत्तं सकृद्यस्तु न तं स्पृशः स्तु श्रुते । यांति तत्पिबेत्कांचिद्दे
वतां सर्वकर्मसु ॥ तस्याउद्दिश्य मनसा दद्यादेवंविधाय वै । नैवंविधे हविर्न्यस्तं न गच्छेद्देवतां क्वचित् ।
निधिरेष मनुष्याणां देवानां पात्रमुच्यते ॥२॥ अथ दर्शपूर्णमासावुपोष्य प्रातर्यजेत न्महाहृसा

दे३

ग्ना लिसूर्यश्चातपतिसहोमकालः स्वस्त्ययनतमः सर्वासामाहुतीनामन्यत्रानिर्दिष्टासु मनाः शुचिः शुचौ व
रूप्यदेशे हर्णीविधुनं चरुं श्रपयित्वा दर्शपूर्णमासदेवताभ्यो यथाविभागं स्थालीपाकस्य जुहोति स्थाली
पाकं पुच ग्रहाणामासादनप्रोक्षणानिमंत्रदेवताभ्यो वदानधर्माश्च सर्वं तु दर्शपूर्णमासाभ्यामन्वारंभणी
यादेवताभ्यो जुहुयाद्दार्पोर्णमासाद्दृश्यानन्तीतः कालश्चादर्शात्पौर्णमासस्य प्रातराहुतिं चैके साय
माहुतिकाले त्वयामन्यंते। नियतस्त्वेव कालोग्निहोत्रे प्रायश्चित्त दर्शनाद्भिन्नकालस्य। नित्याहुत्यो व्री व्या १
३७ हियवतंदुलानामन्यतमद्द्विः कुर्वीताभावेन्यदप्रतिषिद्धं तंदुलांश्चेत्प्रक्षाल्यैक इतरेषामसंस्कारः
सायमग्नये प्रातः सूर्याय प्रजापतये चान्तमयोस्त्री पाकं प्रागाहुतेः समिधमेके यथोक्तं पर्युक्षणं
॥३॥ उच्छ्राय प्रातराचम्याहरहः स्वाध्यायमधीयीता घानोदेव सवितरिति हेऽपहिमनसस्पतइति
सूक्तमृतं च सत्यं चेति सूक्तमादित्या अव हि ख्यतेति सूक्तं शपद्द्रश्रेष्ठानीत्येका हंसः शुचिषदित्येका
नमो महद्भ्यइत्येका यतइंद्र भयामह इत्येका धस्त्व प्रस्येत्येका यो मे राजन्नित्येका मम माग्ने वर्च इति सूक्तं स्व
स्तिनो मिमीतामिति च पंच ॥४॥ चत्वारः पाकयज्ञा हुतोऽहुतः प्रहुतः प्राशित इति पंच सु बहिः शालायां
विवाहचूडाकरण उपनयन केशान्त सीमंतोन्नयनेषु लावो स्मितेऽग्निं प्रणीय निर्मथ्यैके विवाह

उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्यै पाणिं गृह्णीयाद्यालक्षणसं ... ...अस्या अप्यात्ममंग... स्पृशस
माः केशांता आवर्त्ता वयिस्यैस्यातां प्रदक्षिणौ ग्रीवायां वद्धौ तं जनयन् ... ... ति विघातः ॥५॥ जायामुपग्रही
ष्यमाणो नक्षत्रादि इति वरकान्गच्छतो नु मंत्रयते अभिगमने पुष्पफलयवाना... दकुंभा पमहं मोऽहमिति त्रिः नं
प्रोच्यादिते प्राप्तुत्वाम ग्राः प्रत्यासुखा आवहमाना गोत्रनामान्यनुकीर्त्तयंतः कन्यां वरयंत्युभयतोऽ
चिते हर्णपात्रीमभिमृशंति पुष्पाक्षतफलयवहिरण्यमिश्रं अ... ना... ध्यद्मस्यनाधृष्यं देवानामोजोऽन हि
भिशस्त्यमभिशस्तिपाः । अनभिशस्त्तेन्यमंजसा सत्यमुपगेषं सुविते माधाइत्यानः प्रजामिति कन्या धा
पा आचार्यउच्छापयमुई नि करोति प्रजां त्वयि दधामि पशूंस्त्वयि दधामि तेजो ब्रह्मवर्चसं त्वयि द
2 धामीति ॥६॥ प्रतिश्रुते जुहोति चतुरस्त्रं गोमयेन स्थंडिलमुपलिप्य हूर्वयो र्विदिशो द... क्षिणां
श्र४ प्राचीपश्चिमां उत्तरां देवप्राचीमेवं कृ उदक् संस्थां मध्ये लेखां लिखित्वा तस्येदक्षिणतउपरिष्टाद्ध्या
मेकां मध्य एकामुत्तरत एकां ता अभ्युक्ष्याग्निं प्रणयामि मनसा शिवेनायमस्तु संगमनो वसूनां । मानो
हिंसीस्थविरं मा कुमारं शंनो भव द्विपदे शं चतुष्पदे इत्यग्निं प्रणीयतत्त्र्णीं वा प्रदक्षिणमग्नेः समंतात्पा
णिना सोदकेन त्रिः प्रमार्ष्टि तत्समूहनमित्याचक्षते सकृदपसव्यं पित्र्ये ॥७॥ अथ परिस्तरणं प्रागग्रैः

तैभः सुरभिमिश्रैः सशिरस्कां कन्यामाप्लाव्य रक्तमहतं वा वासः परिधाय पश्चादग्नेः कन्यामुपवेश्याज्याह
त्यां महाव्याहृतिभिर्हुत्वाऽत्याकूतीर्जुहोत्यग्नये सोमाय प्रजापतये मित्राय वरुणायेन्द्रायेन्द्राण्यै गन्धर्वा
य भगाय पूष्णे त्वष्ट्रे बृहस्पतये राज्ञे प्रत्यानीकायेति चतस्रोऽष्टौ वाऽविधवाः शाकपिण्डीभिः सुरयान्नेन च
तर्प्पयित्वा चतुरान्नर्त्तनं कुर्युरेता एव देवताः पुंसो विश्रवणमीशानं चात्तो ब्राह्मणभोजनं ॥ ११ ॥ स्नातं कृत
मंगलं वरमविधवाः सुभगाः पुत्रवत्यः कुमार्यै वेश्म प्रपादयन्ति तासामप्रतिकूलः स्यादन्यत्राभक्ष्यपातकेभ्य
पा८ स्ताभिरनुज्ञातोऽस्यै वासः प्रयच्छति रैभ्यासीदिति चित्तिरा उपबर्हणमित्यांजनकोशमादत्ते समंजन्तु
विश्वेदेवा इति समंजनीयापयत्यं शचीवा वा तां सुपुत्रां च पयादिति अविधवांचापालामेवं त्वामिहरक्ष
तादिममिति दक्षिणे पाणौ शललीं त्रिवृतं ददाति रूपं रूपमित्या[illegible]शंसत्ये[illegible] कृरूक्ष्ममादिकं क्षौमं वा
त्रिमणिं प्रतिसरं ज्ञातयोऽस्या बध्नन्ति नीललोहितमिति मधुमतीरोषधीरिति मधूकानि बध्नन्ति विवा
हगामहर्षयित्वा गृहेषु गां ते माधुपर्क्किकौ पश्चादग्नेः कन्यामुपवेश्याज्याहुत्यां महाव्याहृतिभिर्हु
त्वाऽनुहोति समस्ताभिश्चतुर्थीं प्रतीयते तस्यां चोदनायामिव मनादेशे सर्वे [illegible] तिकर्म स्यु पुरस्तात्त्वा
पर्यष्ठाच्चैताभिरेवं कुर्यात् ॥ १२ ॥ संम्राज्ञीश्वश्रुरे भवेति पिता भ्राता वाऽस्याग्रेणा[illegible] ईनिज्जुहोति स्रुवेण

वातिष्ठन्त्यासीनायाः प्राङ्मुख्याः प्रत्यङ्मुखो गृह्णामि ते सौभगत्वाय हस्तमिति दक्षिणेन पाणिना दक्षिणं पाणिं
गृह्णाति साङ्गुष्ठमुत्तानेनोत्तानं तिष्ठन्त्यासीनायाः प्राङ्मुख्याः प्रत्यङ्मुखः पंचचोत्तरा जपित्वा। अमोहमस्मि सा त्वं
सा त्वमस्यमोहं द्यौरहं पृथिवी त्वम् ऋक्सा [illegible] ऽसि सामाहं सामामनुव्रता भव। तावेह विवहावहै प्र
जां प्रजनयावहै पुत्रान्विंदावहै बहूंस्ते संतु जरदृष्टय इ सुदकुंभं नवं मूर्धुवि स्रावयति [illegible] रपित्वा पुंन्नाम्नोहक्षस्य धू८
सक्षीरान्सपलाशान्सकुशानोप्य हिरण्यमिति चैके तं ब्रह्मचारिणे वाग्यताय प्रदाय प्रागुदीच्यां दिशि ताः स्थ पा
प्रदक्षिणम् भवंत्यश्मानं चोत्तरत उपस्थाप्य हिस्तनरीत्वुत्क्षाव्व [illegible] घ्रश्मानमातिष्ठाश्मेव त्वं स्थिरा भव। अभितिष्ठ
[illegible] पृतन्यतः सहस्व पृतनायत इति दक्षिणेन प्रपदेनाश्मानमाक्रमय्य प्रदक्षिणमग्निं पर्याणीयते नैवमंत्रे
णाद्वितीयं वसनं प्रदाय लाजान् शमीपलाशमिश्रान्विता भ्राता वास्याञ्जलावावपत्युपस्तरणाभिघार ८
णं प्रत्यभिघारणं चाज्येन तान्जुहोति॥१३॥ इयं नार्युपब्रूते लाजानावपंतिका। शिवा ज्ञातिभ्यो भूया
सं चिरं जीवतु मे पतिः स्वाहेति तिष्ठंती जुहोति पतिर्मंत्रं जपत्यश्मक्रमणादेवं द्वितीयमेवं तृतीयं तूष्णीका
मेन चतुर्थं प्रागुदीच्यां दिशि सप्तपदान्याक्रमयतीष एकपदी ऊर्जे द्विपदी रायस्पोषाय त्रिपदी मायोभव्याय
चतुष्पदी पशुभ्यः पंचपदी ऋतुभ्यः षट्पदी सखा सप्तपदी भवेति तान्यद्भिः शमयत्यापो हिष्ठा याभिस्तिसृभिस्थ

श्री ५

पामिरङ्गिमाजिपित्वा मरुद्भ्यामि षिच्य गां ददानीत्याह ब्राह्मणेभ्यः किंचिद्घात्सर्वत्र स्थालीपाकादि
शुकर्मसु स्वयं विदुषवा धूपं गो ब्राह्मणस्य वरो ग्रामो राजन्यस्याश्वो वैश्यस्याधिरथं शतं दुहितमते या
न्ति केभ्यो श्वं ददाति ॥ १४ ॥ प्रवासुं यामीति तत्र चेद्गच्छतीति सप्तमानायां जीवं रुदन्तीति प्ररुदं त्याम थरथाक्ष
स्यो पाङ्ग नं पत्नीकुरुते क्षन्नमीमदं तेल्ये तया सर्पिषाभ्युचीतिचक्रे इत्तेचक्रे इति चेताभ्यां चक्रयोः इवयाद
र्भमुत्तरयोत्तरमु[illegible]व खदिरथस्य त्येतया फलवतो वृक्षस्य शम्यागर्ते ब्वेके कांवयां निखाय नित्यावामिमंत्र
यास्वौ पुंजं तियुक्तस्त श्रस्तुदक्षिणइति द्वाभ्यां शुक्रावनद्वाहा वित्येतेनाई चेन्नयु क्त्वावामि मंत्र्या यथं दि
गं.वि.७ रथां[illegible] शीर्येत छिद्येत वा हितान्निगृहीन्नकन्यां व्रपाद्यामि ब्यपस्वरदिस्थे त्येतया[illegible] विद ध्यासं विद्दश्च
मितिपं थ्यं स्वस्तिनोमिमीतामिति पंचचेञ्जिपतिसुक्तिं शुक्र मितिरथमारोहं त्यां मा विदन्परिपंथिन इति
चतुष्पथे पथेव ध्वह इतिश्मशाने वनस्पतेशतव[illegible]इति वनस्पता वद्दुचेञ्जिपतिसुत्रामाणमिति नावमारोहं
त्यामश्मन्वतीति नदीतरं त्यामस्थि वायुक्ते नेवोदूदुर्मि रित्यागाधे प्रेक्षणं चेह प्रियमितिसभृ गृहान्प्रा
प्तायाः छता: परिहाय ॥ १५ ॥ आनडुहमित्युक्तं तस्मिन्नुपवेश्यावार ब्रायां पतिश्चत स्त्रो जुहोत्यग्निनादेव
न पृथिवीलोकेन लोकानामग्वेदेन वेदानां तेनत्वाशमयाम्यसौ स्वाहा वायुनादेवेनांतरिक्षलोकेन लोका

डु २ श्री ४

न

नांयजुर्वेदेनवेदानांतेनत्वाशमयाम्यसौस्वाहासूर्येणदेवेनद्यौर्लोकेनलोकानांसामवेदेनवेदानांतेनत्वाश
मयाम्यसौस्वाहाचंद्रेणदेवेनदिशांलोकेनलोकानांब्रह्मवेदेनवेदानांतेनत्वाशमयाम्यसौ।बृहस्पतिपतिघ्नीं स्वाहार
लक्ष्मीदेवरघ्नीजारघ्नीतांकरोम्यसौस्वाहेतिवाप्रथमयामहाव्याहृत्याप्रथमोपहितान्द्वितीययाद्वितीया
तृतीययातृतीयांसमस्ताभिश्चतुर्थीघोरचक्षुरित्याज्यलेपेनचक्षुषीविमृज्य तकयानस्त्रिवृद्इतितिस्र
भिःकेशान्तानभिमृश्योत्पादेव्यामिवजेतिचतस्रोनुदृत्यांतेस्वाहाकारेणमूर्द्धनिसंस्रावमत्रहेकेकुमा
रमुत्संगमानयंत्युभयतःसुजातमातेयोनिमित्येतयापिवात्सस्त्रीतस्यांजलौफलानिदत्वापुण्याहं
वाचयतिपुंसवतीहमवतीहेवत्समितिस्त्रकशेषेणगृहान्प्रपादयंति॥१६॥दधिक्राव्णोअकारिष
मितिदधिसंपिबेयातांवाग्यतावासीयातामाध्रुवस्यदर्शनादस्तमितेध्रुवंदर्शयतिध्रुवविधिपा
ष्यामयीति।ध्रुवंपश्यामिप्रजांविंदेयेतित्रयात्रिरात्रंब्रह्मचर्यंचरेयातामधःशायीयातांदध्योदनंसं
भुंजीयातांपिबतंचत्वक्षुतंचेतित्वेनसायंप्रातर्वैवाह्यमग्निंपरिचरेयातामग्नयेस्वाहाग्नयेस्वि
ष्टकृतेस्वाहेति।पुमांसौमित्रावरुणौपुमांसावश्विनावुभौ।पुमानिंद्रश्चाग्निश्चपुमांसंवर्द्धतांमयिस्वा ५
हेतिसर्वंगर्भकामादशरात्रमविप्रवासः॥१७॥अथचतुर्थीकर्मत्रिरात्रेनिर्वृत्तेस्थालीपाकस्यजुहो·

तिा अग्ने प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि यस्याः पतिघ्नी तनूस्तामस्या अपज[illegible]हि । वायो प्राय
श्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि । यास्या अपुत्रिया तनूस्तामस्या अपजहि । सूर्य प्रायश्चित्तिरसि त्वं दे
वानां प्रायश्चित्तिरसि । यास्या अपशव्या तनूस्तामस्या अपजहि । अर्यमणं नु देवं कन्या अग्निमयक्षत
समां देवो अर्यमा प्रेतो मुंचातु मामुतः । वरुणं नु देवं कन्या अग्निमयक्षत । सोमां देवो वरुणः प्रेतो मुंचा
तु मामुतः । पूषणं नु देवं कन्या अग्निमयक्षत । सेमां देवः पूषा प्रेतो मुंचातु मामुतः । प्रजापतइ तिसप्त
मीस्रो विषहूत्यघमी ॥ १८ ॥ अध्यमंडामूलं प्रेष पिलनु विलायामूदीषति: पतिवती ति द्वाभ्यामंत
स्वाहाकाराभ्यां नस्तो दक्षिणतो निषिंचेद्गंधर्वस्य विश्वावसोर्मुखमसी त्युपस्थं प्रजनन यिष्यमाणो भि
मृशेत्समाप्ते अर्थे जपे प्राणे नारे तो दधाम्यसावित्यनुप्राणपात् । यथाभूमिरग्निगर्भा यथा द्यौरिंद्रेण
गर्भिणी । वायुर्यथा दिशां गर्भ एवं ग[illegible]र्भं दधामि ते सावित्तिवा । आ ते योनिं गर्भ ए[illegible]तु पुमान्बाण इवे
षुधिं । आवीरो अत्र जायतां पुत्रस्ते दशमास्यः । पुमांसं पुत्रं जनय तं पुमाननु जायतां । तेषां माता भविष्यसि
जातानां जनयांसि च । पुंसि वै पुरुषे रेतस्तत्स्त्रियामनुषिंचतु । तथा तदब्रवीद्धाता तत्प्रजापतिरब्र
वीत् । प्रजापतिर्व्यद [illegible] विनाव्य कल्पयत् । स्त्रीषूपमन्यां सूत्वा दधत्पुमांसमादधादिह । यानि भद्रा

गा ७

ला बीजा निषुहन्यास्तनयं तिन ।इति भिर्दुं पुत्रं जनय स्तुष्वस ईत्नुकामस्य । अभिर्कंदं वीलयस्व गर्भमाधेहि साधया व्रषाणं
वृषं त्वा धेहि प्रजायै त्वा हवामहे । प्रस्वपो निं पतिरेतोऽग्र भा वपुमान्युत्रो धीयतां गर्भे अंतः । तं पिब हि दशमास्योंत
रुदरे सज्जा प्रतां श्रेष्ठ्यतमं स्वानामिति वा ॥ १८ ॥ तृतीये मासि पुंसवनं पुष्येन श्रवणेन वा सोमांशुं पेषयित्वा कुशक
टकं वा न्यग्रोधस्य वा स्कंधस्यां त्यां शुंगां प्रपस्य वा मिष्ठां ... संस्थिते वा प ... जेज्जुहुः संस्रावमग्निनाऽऽपिं तन्न
स्तुरीपं समिद्धान्निर्वनवत । पिशंगरूपः इति नतसमिरं ते स्वाहाकारामिर्नस्तो दक्षिणतो नि षिंचेत ॥ ... स
तुर्थे मासि गर्भरक्षणं ब्रह्मणाग्निः संविदान इति षड्स्थालीपाकस्य ... त्वा क्षीप्यां तेनाग्निकाम्यामि ति प्रत्यृच
माज्यलेपेनां गां न्यंगु विमज्ज्या ॥ २१ ॥ सप्तमे मासि ... प्रथमगर्भे सीमंतोन्नयनं स्नातामहतवाससं पश्चादग्ने
रुपवेश्यां वार ... यां महाव्याहृतिभिर्हुत्वा स्थालीपाकं श्रपयित्वा मुद्गौदनमित्येके पुंवदुपकरणानि स्युर्नक्ष
त्रं चा धाता ददातु दाशुषे प्राचीं जीवातुमक्षितिं । वयं देवस्य धीमहि सुमतिं सत्यधर्मणः । धाता प्रजाया उत
रायस्पतीशे धातेदं विश्वं भुवनं जजान । धाता पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवज्जुहोत इति नेजमेषपराप
तेति तिसृभिः प्रजापत इति षष्ठीभिः श्वेतया शलल्या दर्भ ... सूच्या वौदुंबरशलाटुभिः सह मध्याहूर्ध्वं सी
मंतमुन्नयति भूर्भुवः स्वरिति त्रुत्संगे निधाय त्रिवृत्तिः प्रतिमुच्य कंठे बध्नात्ययमूर्जावतो वृक्ष उदुंबर फलिनी भवेत्य

ईं ८

धौ ५

ई

ई ७

ई ५

:स्प

ईं २

ह ५४

पार्श्वे वीणागाथिनो राजानं संगायतेतियो वाप्यन्यो वीरतरं इत्युदपात्रे स्ततामवनिनीय विष्णुर्योनिं कल्पयतु राका

महमिति वल्शेन पाययेत् यास्या उदरममि मशोत्रा सुवर्णामिगह मांस्त्रिवृन्ते शिरो गायत्रं चक्षुः । छंदांस्यंगा

नि यजूंषि नाम साम ते तनूर्मोदमानी गापयेन्महाहमवतीवा सषमोदक्षिणा।। २२ ।। काकान्स्याम चक्रवात ह

न्याः कोशातक्याः बृहत्याः कालक्लीतकस्येति मूलानि पेषयित्वा पलेपयेद्दशंप सुमित्र जायेत रक्षसाम पह प ४

त्ये।। २३।। अथ जातकर्म। जातं कुमारं विरम्य वान्यं तु प्राण्याहृत्या प्राणि हिय जुषा सम निद्धिसाभ्नोदनीहि

ति। सर्पिर्मधुनी दधुदके च संनिनीय व्रीहियवौ वा संनिधध्यत्रिः प्राशयेज्जातरूपेण व्रतेय च्छामि मधु मनसा

पवेदं ब्रह्म तं सवित्राम घोना। आयुष्मा नुपितो देवताभिः शतं जीव शरदो लोके अस्मिन्निति स सावित्रि ना

भौ५ मास्य दधाति श्रीपवदाघं तरं तस्यं घ्यक्षरं चतुरक्षरं वापि वाप लक्षरं कृतं कुर्यान्न तद्धितं तदस्य पिता

माता च विद्यातां दशम्यां व्यावहारिकं ब्राह्मणा जुष्टं गोः कृष्णस्य मुक्रुरुपस्था निलोहिता मनि चरो माणि

३ मरवंकार यित्वै तस्मिन्नेव चतुष्टये संनिनीयव तुः प्राशयेदिति मांड्केयाम ऋग्वेदं त्वयि दधाम्यसौ

स्वाहा भुवो यजुर्वेदं त्वयि दधाम्यसौ स्वाहा स्वः सामवेदं त्वयि दधाम्यसौ स्वाहेति वामे धजननं द

क्षिणे कर्णे वागिति त्रिः। वाग्देवी मनसा संविदाना प्राणेन वत्सेन सहेन्द्रप्रोक्ता। जुषतां त्वा सौमनसाय दे भौ१

घो५ स्वाहा भूर्भुवः स्वर्वोकोगकाधितिहासषु गणानेसर्वान्वेदांस्त्वयि दधाम्यसौ २

वीमहीमंद्रावाली नाली ची । सलिलांश्च यं प्रति तिवानुमंत्रयेत त्वा लास्त्वेल विग्रंथ्य जातरूपं दक्षिणे पाणौ वधि
न ह्वो च्छा नाह ध्वंद शम्याञ्ज्वालन्तोम्यो दद्याद मा वा कुर्वीत ॥२४॥ दश रात्रे चोच्छानं माता पितरौ शिरःस्नाताव
हत वाससौ कुमारश्च तस्मिन्ने नक्षत्र ति कार्ग्नौ स्थाली पाकं श्रपयित्वा जन्म तिथिं कृत्वा त्रीणि च नामानि सदैवता
नि तन्मध्ये जुहुयात्पश्मि जातं स्यान्नक्षत्रे तु दैवतं सवित्रा । आयुष्टे अघ गोभिः पमग्नि वरेण्यः । आयुर्नो देहि
जीवसे । आयुर्दा अग्ने हविषा हृधानो घृत प्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि
हरक्षतादिममिति त्वं सा ममहेभगम्मति दशमीस्थाली पाकं स्वनामधेयं प्रकाशं कृत्वा ब्राह्मणान्स्वस्ति
वाच्येवमेव मासि मासि जन्म तिथिं त्वो द्वि संवत्सराद्दृग्येतो जुहोति ॥२५॥ अग्नये कृत्तिकाभ्यः प्रजापत
यरोहिण्यै सोमाय मृगशिरसे रुद्राया आर्द्राभ्यो अदितये पुनर्वसुभ्यां बृहस्पतये पुष्याय सर्पेभ्यो श्लेषा
भ्यः पितृभ्यो मघाभ्यो भगाय फल्गुनीभ्यामर्यम्णे फल्गुनीभ्यां सवित्रे हस्ताय त्वष्ट्रे चित्रायै वायवे स्वा त
य इंद्राग्निभ्यां विशाखाभ्यां मित्रायानुराधा इंद्राय ज्येष्ठाय निर्ऋत्यै मूलायाद्भ्यो षा ढाभ्यो विश्वेभ्यो
देवेभ्यो षाढाभ्यो ब्रह्मणेऽभिजिते विष्णवे श्रवणाय वसुभ्यो धनिष्ठाभ्यो वरुणाय शतभिषजे अजायैकप
दे प्रोष्ठपदाभ्यो हिर्बुध्न्याय प्रोष्ठपदाभ्यः पूष्णे रेवत्या अश्विभ्यामश्विनीभ्यां यमाय भरणीभ्यः ॥२६॥ षष्ठे

ग्रं १०

उ

मास्यं न्नप्राशनमाजमन्नाद्यकामस्तैत्तिरं ब्रह्मवर्चसकामो मात्स्यं जवनकामो घृतौदनं तेजस्कामो दधिमधु
घृतमिश्रमन्नं प्राशयेत् । अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतु
ष्पदे ॥ यद्भूमिमहस्थित । इममग्न आयुषे वर्चसे तिग्म[illegible]मो जो वरुण सोम राजन् । माते वास्मा अदितिः शर्म
यंसद्विश्वे देवा जरदष्टिर्यथासदिति कुमारमग्न आसूचीत्यभिमं त्वादग्ने युक्त शपुस्यामाष्टधि विमवेत्तु प
वेश्यमहा[illegible]व्याहृतिभिः प्राशनं शेषं माता प्राश्नीयात् ॥ २२ ॥ संवत्सरे चूडाकर्म तृतीये वा वर्षे पं
चमे क्षत्रियस्य सप्तमे वैश्यस्याग्निमुपसमाधाय व्रीहियवानां तिलमाषाणामिति पात्राणि चत्वार्यपि वा
नडुहं च गोमयं कु[illegible]शमितं केशप्रतिग्रहणार्थं दर्शं नवनीतं लोहक्षुरं चोत्तरत उपस्थाप्य संहत्य धस्ता
वरीहृतिर्णिणाम धुमन्तमाः । हचतीर्मधुना पयामंद्राधनस्यसातय इत्युष्णास्व स्नुशीतास्व आसिंचति । आ
पउं दंतु जीवसे दीर्घायुत्वाय वर्चसे त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषमगस्त्यस्य त्र्यायुषं यद्देवानां त्र्या
युषं तन्ने करोमि त्र्यायुषमित्यसाविति शीतोष्णाभिरद्भिर्दक्षिणं केशपक्षं त्रिरभ्युनक्ति शललयैके विज
टान्कृत्वा नवनीतेनाभ्यज्यौषधे त्रायस्वेनमिति कुशतरुणमंतर्दधाति । केशान्कुशतरुणं चादर्शनसं
स्पृश्य तेजोसि स्वधितिष्टे पितामैनं हिंसीरिति लोहक्षुरमादत्ते येनावपत्सविता श्मश्रुं ग्नेक्षुरेण राज्ञो

वरुणस्य विद्वान् येन धाता बृहस्पतिरिंद्रस्य चावपच्छिरः। तेन ब्रह्माणो वपतेदमद्यायुष्मांद्दीर्घायुरयमस्तु वीरोसा

वितिके शाग्राणि छिनत्ति कुश तरुणं चैवं द्वितीयमेवं तृतीयमेवं द्विरुत्तराभ्यां नित्क्षयोः षष्ठसप्तमे गोदानक

र्मत्येतदेव गोदानकर्म यच्चूडाकर्म षोडशे वर्षे द्वादशे वा तृतीयेनु प्रवपने गां दद्यात्यहं तं च वासः स्त्रष्ट्री

मान्नूतः कन्यानां वा गुदीच्यां दिशि ब्रह्मोपधिकदेशे पां वा समीपे केशांन्निखनंति ना पिताय धान्य पात्राणि

नाप्पिताम धान्य पात्राणि॥ ॥इति श्री शांखायनगृह्ये प्रथमोध्यायः समाप्तः॥ गर्भाष्टमेषु ब्राह्मणमुपनयेत्

णायेनाजिनेन गर्भदशमेषु वा गर्भैकादशेषु क्षत्रियं रौरवेण गर्भद्वादशेषु वैश्यं गव्येनाषोडशाद्वर्षाद्ब्राह्म

णस्यानतीतः कालश्चा द्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्यात ऊर्ध्वं पतितसावित्रीका भवंति नैना ८

नुपनयेन्नैनानध्यापयेन्न याजयेन्नैभिर्व्यवहरेयुरहतेनः सर्वा कांन्मे खलिनामौंजी मेखला ब्राह्मण

णस्य नैयग्रोधः क्षत्रियस्यौदुंबरो वैश्यस्य प्राणसंमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य कू

शां.उ श्य संमितो वैश्यस्य सर्वे वा सर्वेषां येनाहतेनोपनयेत ताचार्यधीनं तत्पर्यं वाप्योपनेयं स्यादाप्लुत्या

लंकृत्य कृत्वा जघनेनाग्निं तिष्ठतः प्राङ्मुख आचार्यः प्रत्यङ्मुख इतर स्तिष्ठंति ष्ठं तमुपनयेत मित्र ॥१॥

स्यं१ स्य चक्षुर्वरुणं बलीयस्तेजो यशस्विस्थविरं समृद्धं। अनाहनस्यं वसनं चरिष्णुं परिदं वाज्यजिनं दधे नं१

धनुर्ज्या क्षत्रियस्य गोणसूत्री वैश्यस्य पालाशो बैल्वो वा दंडो ब्राह्मणस्य ४

ह

पं परस्यं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती नआगात्। प्राणापानाभ्यां बलमाविशंती सखादेवी
स्व२ सुभगामेखलेयमिति त्रिर्मेखलां प्रदक्षिणं त्रिः परिवेष्ट्य ग्रंथिं करोत्ययोपिवा प्यवापंचयज्ञोपवीतं कृ
त्वा यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामीत्यंजली हस्त्यित्वा थेनमाह को नामासीत्यसावहंभो
३ इतीतरः समानार्षेयइत्याचार्यः समानार्षेयोहंभो ३ इतीतरो ब्रह्मचारीमभवान्ब्रूहीति ब्रह्मचार्यहंभो
३ इतीतरो मधु विस्वरित्यस्यां जलाद्वंजली स्त्रीनासिमेद दक्षिणोत्तराभ्यां पाणिभ्यां पाणीसंगृह्य जप थ५
ति देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामुपनयाम्यसाविति। गणानां त्वेति गणका
मानां तामारिषं एयेनेतियोधमहाव्याहृतिभिर्व्याधितान् ॥२॥ भगस्तेहस्तमग्रभीत्सविताहस्तम
ग्रभीत्पूषाते हस्तमग्रभीदर्यमा हस्तमग्रभीन्मित्रस्त्वमसि धर्मणा ॰ग्निराचार्यस्तव। असावहंचोमा
वन एतं ते ब्रह्मचारिणं परिददामीन्द्रैतं ते ब्रह्मचारिणं परिददाम्यादित्यैतं ते ब्रह्मचारिणं परिददा
मि विश्वेदेवा एतं वो ब्रह्मचारिणं परिददामि दीर्घायुत्वाय सुप्रजास्त्वाय सुवीर्याय रायस्पोषाय सर्वेषां
वेदानामाधिपत्याय सुश्लोक्याय स्वस्तये। ऐन्द्रीमावृतमावर्त्त आदित्यस्यावृतमन्वावर्त्त इति दक्षिणं
स्यं बाहुमन्वावृत्य दक्षिणेन प्रादेशेन दक्षिणंमंसमन्ववहृत्यारिप्यतस्ते हृदयस्य त्रियोमस्यासमिति हृद

यदेश्मानमभिमृशति तत्त्वौ त्रसस्मं पर्यावृत्याचास्त्वाङ्गुलिं पालिं हृदयेन धापयजपति ॥३॥ मम व्रते हृदयं ते दधा
मि मम चित्तमनु चित्तं ते अस्तु । मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति कामस्य ब्रह्मचर्य
स्यासा वित्तिनेनैवमंत्रेण तु थैवपर्यावृत्य दक्षिणेन प्रादेशेन दक्षिणमंसमन्वारभ्य जपति ब्रह्मचार्यसि स
मिधमाधेह्यपोशान कर्म कुरु मा दिवा सुषुप्था वाचं यच्छ समिदाधानात् । एषा ते अग्ने समित् इत्य
भ्यादधाति समिधं तृतीयां ॥४॥ संवत्सरे सावित्री मन्त्राह त्रिरात्रे अन्वक्षं वा गायत्रीं ब्राह्मणायानुब्रू
यात्त्रिष्टुभं क्षत्रियाय जगतीं वैश्याय सावित्रीं त्वे वा तरेणाग्निमुपविशतः प्राङ्मुख आचार्यः प्रत्यङ्मुख
इतरो धीहि भो ३ इत्युक्त्वाचार्य ॐकारं प्रयुज्याथैतरं वाचयति सावित्रीं भो ३ अनुब्रूहीत्यथास्मै
सावित्रीमन्वाह तत्सवितुर्वरेण्यमित्येतां पच्छोऽर्धर्चशोऽनवानं ॥५॥ आपो नामस्थ शिवा नामस्थो
र्जा नामस्थाजरा नामस्थाभया नामस्थामृता नामस्थ तासां वो शीय सुमतौ माधत्तेत्येवं त्रिरप आचम
य्योपस्पृशति नो मिमीतामिति पंचपर्वेन दण्डं प्रयच्छति वृत्तो दक्षिणा प्रदक्षिणमग्निं पर्याणीय भिक्षेतेग्रामं
मातरं त्वेव प्रथमां यावेनं न प्रत्याचक्षीताचार्याय भैक्ष्यं निवेद्य तेनानुज्ञातो गुरुणा भुञ्जीताहरहः
समिदाधानं भिक्षाचरणमधःशय्यां गुरुशुश्रूषेति ब्रह्मचारिणो नित्यानि ॥६॥ अथानुवाचनस्याग्ने

देवता भो ३ अनुब्रूहीतीतरो देवतास्ते अनुब्रवीमीत्याचार्यः

रू१

उत्तरत उपविशतः प्राङ्मुख आचार्यः प्रत्यङ्मुख इतरो ऽभिवाद्य पादावाचार्यस्य पाणी प्रक्षाल्य दक्षिणेन जानु
नाक्रम्य मूले कुशतरुणाग्रं दक्षिणोत्तराभ्यां पाणिभ्यां मध्ये परिगृह्यतां सव्येनाचार्ये प्रसंगृह्य दक्षिणेनाङ्गुः
पास्थि विंन्नयेतरं वा यपति सावित्री ३ भो अनुब्रूहीतीतरः सावित्रीं ते अनुब्रवीमीत्याचार्यो गायत्रीं भो ३ अ
नुब्रूहीतीतरो गायत्रीं ते अनुब्रवीमीत्याचार्यो विश्वामित्रीं भो ३ अनुब्रूहीतीतरो वैश्वामित्रीं ते अनुब्र
वीमीत्याचार्यः ऋषीन् भो अनुब्रूहीतीतरः ऋषींस्ते अनुब्रवीमीत्याचार्यश्छंदांसि भो ३ अनुब्रूहीतीतरश्छं
दांसि ते अनुब्रवीमीत्याचार्यः श्रुतिं भो ३ अनुब्रूहीतीतरः श्रुतिं ते अनुब्रवीमीत्याचार्यः स्मृतिं भो ३ अनु
ब्रूहीतीतरः स्मृतिं ते अनुब्रवीमीत्याचार्यः श्रद्धामेधे भो ३ अनुब्रूहीतीतरः श्रद्धामेधे ते अनुब्रवीमीत्या
चार्य एवमेव मन्त्रे यस्य यस्य योयो मंत्रो पद्दैवत्यो पच्छंदाश्च तथा तथा तं तं मंत्रमनुब्रूयादपि वा विंदन्न मो ७
षिर्दैवतं छंदो ऽसि तत्सवितुर्वरेण्यमित्येतां पच्छोर्द्धर्चशोनवानमित्येव ति समाप्त आहाचार्य एवमे
म ३ केकमृषिमनुवाकं वानुब्रूयात्सूक्तस्य ऋषिमनुवाकं यावद्वा गुरुर्मन्येत यो ऽन्तमेकामं सूक्तं वानुब्रूयादृ
षेरनुवाकस्य वैकैकं सूक्तादावित्येषा प्रमतिर्हि ति कामं सूक्तादावाचार्य इत्येत दक्षिणा स्वाध्यायेप्या
ख्यातं समाप्ते कुशतरुणानादाय न दुहेन्मूले कुंठं वा यथा सूक्तं कुशाग्रपोनिषिंचत्यहः शेषं स्यात्

मुपवासश्च ॥७॥ अपरा ह्लि स्नातधमनाभिक्षितान्या कुत्तिधर्मेणाग्नौ पाणिना जुहुयात्स्वरसस्पतिमद्भुतमिति प्रत्य
वंस्त्र कुशोबेणा भक्षेराचार्यस्य स्त्रिवाच्यं ॥८॥ अरण्यैसमित्पाणिः संध्यामुपास्ते नित्यं वाग्यतउत्तरापराभिमुखो
व्यमदेशमानक्षत्राणां दर्शनादर्कांतिं तायांमाहाव्याहृतीः सावित्रीं स्वस्त्ययनानि च जपेदेवं प्रातः प्रा
ङ्मुखस्तिष्ठेन्नामंडलदर्शनात् ॥९॥ उदिने प्राधुन्यमहरहः सायंप्रातरग्निमुपसमाधाय परिसमुह्याभ्युप
र्युक्ष्य दक्षिणं जान्वाच्याग्नये समिधमाहार्षं बृहते जातवेदसे । समे ग्रदं चमे धीं च जातवेदाः प्रयच्छतु
स्वाहा । एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि स्वाहा । समिद्धोमांसमईय पत्रजया च धनेन
च स्वाहा । एषा ते अग्ने समित्तया वर्द्धस्व चाप्यायस्व । वर्द्धिषीमहि च वयमाप्यासिषीमहि स्वाहेत्यथ पर्यु
10 क्ष्याग्निः अर्द्धं च मे धां चाविनिपातं स्मृतिं च मे ईलितो जातवेदा अयं मुनं नः संप्रयच्छत्वित्यग्निमुपतिष्ठ १०
ते । सोपर्णश्रितमाविकं ति ष्ठन्दृढं संप्रदायानुच्छितं प्रायुषं पंचभिर्मंत्रैः प्रतिमंत्रं ललाटे हृदये दक्षिण ग्रा ४
स्कंधे वामे च ततः द ष्ठ च पंच सु भस्मना त्रिपुंड्रं करोति स एते ब्रांवदानामकं ह्रेत्रीन्सर्वा वाधीते य एवं हु
ताग्निमुपतिष्ठते ॥१०॥ अथ व्रतादेशनं तस्योपनयनेन कल्पो व्याख्यातो न सावित्रीमन्वाह दंडप्रदानांत
मित्येक उदगयने शुक्लपक्षे होरात्रं ब्रह्मचर्यमुपेत्याचार्यो मांसाशी ब्रह्मचारी चतुर्दशीं परिहाप्याष्ट

य ५

मीचाद्योत्तमेनैकेयांवान्यांमब्रशस्तांमन्येततस्यांशुक्लियेब्रह्मचर्यमादिशेत्त्रिरात्रंब्रह्मचर्यंचरेद्द्वाद
शरात्रंसंवत्सरंवायावद्वागुरुर्मन्येतशाकरनुसंवत्सरंव्रातिकमोपनिषदंचाह्नर्णेकालेचरितेब्रह्म
चर्यं शंयोर्वार्हस्पत्यांतेवेदेन्तकेरहस्यंश्रावयिष्यकालनियमंचादेशेनव्रतीयेत॥२१॥कृतप्रातराश
स्यापराह्णेपराजितायांदिशिकृत्वाचार्योग्निंयथास्ववेदेवतासुपरीतोभवतितास्ववेनंसहछन्दस्याया
मिंद्रआदित्यविश्वेषुचदेवेषुचरितंतेब्रह्मचर्यंचरितंमाइतिप्रत्युक्तेपश्चादग्नेःपुरस्तादाचार्य
स्यप्राङ्मुखोवस्थितेहतेनवाससाचार्यःप्रदक्षिणंमुखंत्रिःपरिवेष्ट्योपरिष्टाद्दशाःकृत्वायथानसं
भ्रश्येतत्रिरात्रंसमिदाधानंभिक्षाचरणमधःशय्यांगुरुशुश्रूषांचाकुर्वन्वाग्यतोप्रमत्तोरण्येदेव
कुलेग्निहोत्रेवोपवसस्त्वत्यत्रहैकेतानेवनियमांस्तिष्ठतारात्र्यामेवोपदिशंत्याचार्योमांसाशीब्रह्म
चारीत्रिरात्रेनिर्वृत्तेरात्र्यांवाग्रामान्निष्क्रम्यन्नैतानीक्षेतानध्यापानपिशितामंचंडालंसूतिकांरजः
स्वलांतदनिमपहस्तकान्श्मशानंसर्वाणिचशवरूपाणिवान्यास्येनप्रविशेपु[struck]न्त्रागुदीचींदि
शमुपनिष्क्रम्यश्वोदेशाप्राङ्मुखआचार्यउपविशत्सुदिनआदित्येअनुवाचनधर्मेणवाग्यतायोक्षी
षिणाबाहाःमहानाम्नीर्वैवैनियमोष्यातेरेषुप्रकरणेषुस्वाध्यायेमवकुर्वतआचार्यस्मरःश्रणा

त्त दक्षिणेषं भाजनं दक्षिणां गां ददाति त्वं तमित्युत्वादि वीति च प्रणवेन वा सर्वमत्रं हे के वैश्वदेवं चरुं कुर्वते स्वं
पुष्पकरणेपुपया परीनमिति मां हुके यः ॥१२॥ अथातो दंडनियमानां तरागमनं कुर्याद्यात्मनो दंडस्याथ चेद्दं
डमेखलोपवीतानामन्यतमद्विशीर्येत छिद्येत वा तस्य तत्प्रायश्चित्तं यद् दुह्वा हरं त्यस्य मेखलां चेदसंदेहा
मवत्यन्यां हृत्वानुमंत्रयते मेध्यमे ध्या विभागच्छे देवि गोत्रे सरस्वति मेखले स्वं तमच्छिन्नं संतनु व्रतं
ममात्वमग्ने व्रतम... छुचिरग्ने देवो इहावहा उप यज्ञं हविश्च नः व्रतानि बिभ्रद् व्रतपा अदाभ्यो मवानो दूतो
अजरः सुवीरः दधद्रत्नानि सुमतीको अग्ने गोपायनो जीवसे जातवेद इत्युपवीतं च दंडं च बध्ना
ति नव्यं तत्ताय ज्ञोपवीतं दंडं च मेखलामजिनं तथा जुहुयाद प्सु व्रतेस्त्रेणं वा रूप्यचारिसेन वा ॥१३॥
अथ वैश्वदेवो व्याख्यातो होमकल्पो वैश्वदेवस्य सिद्धस्य सायं प्रातर्गृह्येग्नौ जुहुयादग्नये स्वाहा सो १९
माय स्वाहेंद्राग्नीभ्यां स्वाहा विष्णवे स्वाहा भरद्वाज धन्वंतरये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा प्रजापतये
स्वाहादितये स्वाहानुमतये स्वाहाग्नये स्विष्टकृते स्वाहेति हुत्वै तासां देवतानामथ वास्तुमध्ये बलिं हरेद्दे
ताभ्यश्चैव देवताभ्यो नमो ब्र... ब्राह्मणेभ्यश्च वास्तोष्पते प्रति जानीह्यस्मानिति वास्तुमध्ये वास्तो
ष्पतये चापश्च रेभ्य इति प्रातर्ये देवा सह इति चाविज्ञाताभ्यो देवताभ्य उत्तरतो धनपतये च प्राचीनावीती
यदिशां प्रदक्षिणं यथारूपं बलिं हरति नम इंद्राय इंद्रपुरुषेभ्यश्च नमो यमाय यमपुरुषेभ्यश्च नमो वरुणाय वरुणपुरुषेभ्यश्च नमः सोमाय सोमपुरुषेभ्यश्च नमः
स्याने ... इति मलिके नमः श्रियै ... गुह्यदेशे नमः सर्वान्नभूतये यथांतरिक्षे न... चरेभ्य इति साय

सं२

दक्षिणतः शेषं समनयति। ये अग्निदग्धा इति देवपितृनरेभ्यो दत्वाऽग्रो त्रियं भोजयेद्ब्रह्मचारिणो वा भिक्षां दद्याद
नंतरं सौवासिनीगर्भिणीकुमारी[illegible]स्थविरांश्च भोजयेद्गृह्यः श्वपचेभ्यश्च वयोभ्यश्चावपेद्भूमावित्तिनाऽवत्त
मश्नीयां नैकोनश्रवं तदध्यतद्वृत्तौ नंकमोघमन्नं विंदते अप्रचेता इति ॥२४॥ यस्मां चेद्व्याणामन्यतमआ
गच्छेत्तो पशुमजमन्नं वा प्यपस्यामान्यतमं मंन्येत तत्कुर्यान्नामांसोऽर्घ्यः स्यादधियज्ञमधिविवाहं कुरूते
त्येवं ब्रूयादाचार्यायाग्नेपत्नि त्विजे वार्हस्पत्यो वैवाह्याय प्राजापत्याय राज्ञ ऐंद्रः प्रियाय मैत्रः स्नातकायै
न्द्राग्नो[illegible]पद्यप्यसकृत्संवत्सरस्य सोमानयजेत कृतार्घ्या एवैनं याजयेयुर्नाकृतार्घ्या इति द्पि भवति ॥२५॥ म
धुपर्के च सोमे च पितृदैवतकर्माणि। अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः। आचार्यश्च पिता चामा
२५ सखा चानतिथिर्गृहे। तैबद्दिद्ध्युस्तत्कुर्यादिति धर्मो विधीयते। नैकग्रामीणमतिथिं विप्रां प्रागतमेव
चाउपस्थितं गृहे विद्यादार्यां यत्राग्नयोऽपि वा॥ अग्निहोत्रं बलीवर्दः कालेचातिथिरागताः। बालाश्च
कुलवृद्धाश्च निर्दहन्त्यपमानिताः। ~~बालाश्च कुलवृद्धाश्च निर्दहन्त्यपमानिताः।~~। अनड्वानग्निहोत्रीच
ब्रह्मचारी च ते त्रयः॥ अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नतां॥ देवताः पुरुषं गृहा स्वहरहर्गृहमेधिनां सं३
भागार्थमुपसर्पंति ताभ्यो निर्वप्तुमर्हति ॥२६॥ तेणान्यप्रच्छतोनित्यमग्निहोत्रं च जुहुतः। सर्वस्तु हृत

स्वस्ती त्यु च्चैराचार्यः

मादत्ते ब्रह्मलोकान्निवर्तितो वसनं । उदपात्रानुदातव्यमाकाशाज्जुहुयादपि । आसन्नाद्दानुवाकाद्वा ब्रह्मयज्ञो विधीयते । नोप
वासः प्रवासे स्यात्पत्नी धारयते व्रतं । पुत्रो भ्राताथवा पत्नी शिष्यो वास्य बलिं हरेत् तां वैश्वदेवमिमं येनु स्वाध्यायं प्रातः प्रकु
र्वतेति अर्थेतः पुनाकीर्त्याः प्रजाभिश्च समृध्येयुरिति ॥१७॥ ब्रह्मचारी प्रवत्स्यन्नाचार्यमामन्त्रयते प्राणापानयो
रित्युपांश्वोमहं वत्स्यामि भो३ इत्युच्चैः प्राणापानाभ्यामुरुव्यचास्त्वया पात्रं पश्ये । देवा पवमानो गो ब्रूयात्दद्दामि देव सवितरे
षते ब्रह्मचारी तं ते परिददामि तं गोपाय स तं मा मृधस्वेत्युपांश्वों स्वस्तीत्युच्चैराचार्यः ॥१८॥ इति शांखाय
नगृह्यसूत्रे द्वितीयोध्यायः ॥ ॥ स्नानं समावर्त्स्यमानस्यानडुहमित्युक्तं तस्मिन्नुपवेश्य केशश्मश्रूणि वापय सि
ति लोमनखानि चत्रीहियवे स्थिल सर्षपैरपामार्गैः सदापुष्पीभिरित्युद्धाप्याप्लाव्यापोहिष्ठीयनाभिस्नात्वालंकृ
12 त्य पुनर्वस्त्राणीति वासः प्रतिपरिधाय यथास्मै निष्कं बध्नात्यायुष्यं वर्चस्यं मम मा स्न व च इति वेष्टनं गृहं गृह १२
मह ४ नायातीति छत्रमारोहते त्युपानहौ दीर्घसत्रे अस्त्वं कुशा इति वैणवं दंडं मादत्ते प्रतिलीनस्तदहस्तासीत व
नस्पते वीड्वङ्गः शास इत्यथैतिरथमारोहेत घट्टेनं गवा वा पत्भुना वा अहरयुक्त त्रयेवमुपवतिष्ठते गोम्योवास
मावर्तनपर्युत्तोवा वृक्षादिद्रः । अप्यानद्रविणा नयेहि स्यानाट्यविभवेत्यवरोहतीप्सितमन्नं तदह
र्भुंजीत । आचार्यपवस्त्वयुगंदधादुष्णीषमणिकुंडलं दंडोपानहं छत्रं च ॥१॥ अगारं कारयिष्यन्निहान्नाधाय

विशः परिगृह्णामीत्युदुंबरशाखयात्रिः परिलिख्य मध्ये स्थंडिले जुहोति स्सैकोसि कस्यासि कायपते ग्राम
कामा जुहोमि स्वाहा। अस्यां देवानामसि भागधेयमितः प्रजाता पितरः परेताः विराल जुहृद्ग्रामकामो
न देवानां किंचनांतरेण स्वाहेति स्थूणागर्त्तान्विखान्यत्वोदमन्याना सिंचेदिमां विमिन्मि अमृतस्य शाखां
मध्ये धर्त्तां ध्रुवतरणीं वसूनां। एनां शिशुः क्रंदत्याः कुमार एनां धेनुः क्रन्दतु नित्यवत्सेत्युदुंबरशाखां घृ
तेनाक्तां दक्षिणपूर्वगर्त्ते निदधाति। इमामुच्छ्रयामि भुवनस्य शाखां मध्ये धर्त्तां ध्रुवतरणीं वसूनां। एनां
शिशुः क्रन्दत्या कुमार एनां धेनुः क्रंदतु पाकवत्सेत्युत्तरत एवं द्वयोर्द्दिया दक्षिणतः पश्चादुत्तरतश्चाइ
३८ मामहमस्य वृक्षस्य शाखां घृतमुक्षन्तीममृते मिनोमि। एनां शिशुः क्रन्दत्याः कुमार आस्यन्दतां धेनवो
नित्यवत्सा इति स्थूणाराजमुच्छ्रयत्येवं कुमारस्तरुण आ वत्सो भुवनस्यारि। एनं परिस्रुतः कुंभ्या आ
दध्नः कलशैरगमन्॥२॥ इहैव स्थूणे प्रति तिष्ठ ध्रुवाश्वावती गोमती सीलमावती। क्षेमे तिष्ठ घृतमुक्ष
माणे हे वतिष्ठ निमित्ता नितिल्विला स्या इरावती। मध्ये पोषस्य रंपतां मा त्वा प्रापन्नघायवः। उप
हूता इह गाव उपहूता अजावयः। अथो अन्नस्य कीलाल उपहूतो गृहेषु [illegible]नः॥ रथंतरं प्रति तिष्ठ
वामदेव्यमयस्व बृहतिष्ठिता माय तिस्थूणाराजममिमृशति। सम्मितस्य स्थूणाः संमृशति सत्यंचश्र

चति सर्वं यज्ञस्य दक्षिणा चेति दक्षिणो बलस्यौजस्वित्यपरे ब्राह्मणवक्षत्रे न्युत्तरे श्री स्तूपो धर्मस्थूणा राजो हो रात्रे
द्वारफलके संवत्सरोपिधानमुक्षासमुद्र इत्यभ्यन्तमश्मानं स्तम्भस्याधस्तान्निखनेत् ॥३॥ वास्तोष्पतीय
कर्मण्यग्निं दध्यामि मनसा शिवेनायमस्तु संगमनो वसूनां । मा नो हिंसीः स्थविरं मा कुमारं शन्नो भवन्द्वि
पदे शन्नश्चतुष्पद इति गृह्यमग्निं वा घृतमुपसमाधाय प्रागग्रेषु नवेषु कुशेषु दकुंभं नवं प्रतिष्ठाप्यारिष्टा
अस्माकं वीरा मा परासेचि नो धनमित्यभिमंत्र्यार्थं तरस्य स्तोत्रियेण पुनरादाय कंकुष्कारमितिति
स्रः स्वधिष्ठितं जुहोति । वामदेव्यस्य मध्यंदिने हृहेतोपराह्णे महाव्याहृतीयज्ञतस्त्वा वास्तोष्पत इति
13 तिस्रोमीवहा वास्तोष्पते वास्तोष्पते ध्रुवा स्थूणा सौविष्टकृत्त दशमी स्थालीपाकस्य रात्रौ ज्येष्ठं पुत्र
मादाय जायां च सह धान्यैः प्रपद्यते । इंद्रस्य गृहाः शिवा वसुमंतो वरूथिन[illegible]न हं प्रपद्ये सह जाय १२
या सह प्रजया सह पशुभिः सह रायस्पोषेण सह यन्मे किंचास्ति तेन ॥४॥ शाल्मंशग्मं शिवं शिवं स
माय वः शांत्यै प्रपद्ये भयन्नो अस्तु ग्रामो मारण्याय परिददातु विश्व महाय मा परिदेहीति या माग्निक्षा
मन्तरण्यं ग्रामाय परिददातु मह विश्वाय मा परिदेहीति ग्रामं प्रविशन्नारक्षौ गृहान्भद्रान्सुमनसः
प्रपद्ये वीरघ्नो वीरवतः सुवीरान् । इरां वहन्तो घृतमुक्षमाणा अन्येष्वहं सुमनाः संविशेयमिति स

य

दाप्रवचनीयः ॥५॥ अनाहिताग्निः प्रवत्स्यन्गृहान्समीक्षते इमान्मे मित्रावरुणौ गृहान्गोपायतं युवां
अविनष्टान् विहुतान् पूषैनानभिरक्षतु आस्माकं पुनरागमादपि पंथामगन्महीति च जपति ॥६॥ अथ प्रवा
स्यायन् गृहान्समीक्षते । गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि । ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहाने
मि मनसा मोदमानः । येषामध्येति प्रवसन्येषु सौमनसो बहुः । गृहानुपह्वयामहे ते नो जानन्तु जानतः । उपहू
ता इह गाव उपहूता अजावयः । अथो अन्नस्य कीलाल उपहूतो गृहेषु नः । अयन्नो अग्निर्भगवानयन्नोभ
गवत्तरः । अस्यो पसद्य मा रिषाम मा यं [illegible] पदधातुन इति गृह्यमग्निमुपस्थाय कल्यामीं [illegible] यादि राज्ञो पा० चं ८
दोहास्ति विराज्ञो दोहमशीय मयि पपाय विराजो दोह इति पाद्यप्रतिग्रहे ॥७॥ अनाहिताग्निर्नवं प्राशि
ष्यन्नाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्यः स्वाहाकारेण गृह्येऽग्नौ जुहुयात्प्रजापतये त्वा गृहं गृह्णा मि
म्यहं श्रियै महं यशसे महमन्नाद्यायेति प्राशनार्थीयमभिमंत्र्य भद्रान्नः श्रेयः समनैष्ट देवास्त्वयाव
श्रे २ सेन समशीमहि त्वा । स नो मयोभूः पितवाविशस्व शन्नो मवद्विपदे शं चतुष्पदे इत्यद्भिः [illegible]
ः प्राश्नात्यमोसि प्राण तदृतं ब्रवीम्यमासि सर्वाननुप्रविष्टः स मे जरां रोगमपनुद्य शरीरादमाम एधि मा
मृधाम इंद्रेति हृदये देशमभिमृशति नाभिरसि मा बिभीथाः प्राणानां ग्रंथिरसि मा विस्रस इति नाभिं

ति॥ नं

मद्रंकृत्तमिति तिसृभिर्यथालिंगं तच्चक्षुरित्यादित्यमुपस्थाय॥८॥ पश्चिवः सेन्याइध्माव्याहृं जन्तुघोषिण्यः। समान
गो स्त्रस्यगोपतेर्मीवो अंशुशोनवारिषत्। इषागा अवेतुन इति गाः प्रतितिष्ठमाना अनुमंत्रयेत परिश्व
त्तिपरिक्रांतासु। यासां स्वधस्त्रनुबलं मधेः स्वर्लं घृतस्य च। तानः सं तु पयस्वती बहीर्गोष्ठे घृताच्य इत्या
घृ४ गावो अग्मन्निति च संस्रौगतासु तत्र मामगाकुर्वमिनो मृबतिइति संतेन गोष्ठगताः।९॥ पाफाल्गुन्याउत्त
रामावास्यासारेवत्यासंप्रघेतेतस्यामंकल्लक्षणानि कारयेद्भुवनमसिसहस्रपोषमिंद्रायत्वाश्ववाददक्ष सू॥२७
ब्लौ८ तमस्यारिष्टमिल्लांन्नंगोपायनं यावतीनामिदंकूलक्षणानि कारयेद्भुवनमसि सहस्रपोषमिंद्रायत्वाश्व
वोददक्षतमस्यरिष्टमिल्लांन्नंगोपायनं यावतीनामिदंकुरिष्यामि मूपसीनामुत्तमां सामां क्रियास २४
मिति याः प्रथमाः प्रजायेत तस्याः पीयूषं जुहुयात्संवत्सरीणं पयउस्त्रियायाइत्येताभ्यामगम्यांयदि
15 यमौ प्रजायेत महाव्याहृतिभिर्हुत्वा यमसूं दद्यात्।१०॥ अथ वृषोत्सर्गः। कार्त्तिक्यां पौर्णमास्यां रेवत्यां वा
श्वयुज्यस्य गवां मध्ये सुसमिद्धमग्निं कृत्वाज्याहुतीर्जुहोति। इह रतिरिह रमध्वं स्वाहा। इह धृतिरिह स्व
धृतिः स्वाहा। उपसृजं धरुणं मात्रे धरुणो मातरं धयन्। रायस्पोषमस्मासु दीधरत्स्वाहा। पूषागा अन्वे
तु न इति पौष्णस्य जुहोति रुद्रांजपित्वैकवर्णं द्विवर्णं त्रिवर्णं वा यो वा यूथं छादयति यं वा यूथे नच्छाद

रोगे हुतो वै वस्या त्वस्सर्वं गे हुवेतो दृश्येव च्छ्वित मंस्या न्नमलं हृत्य श्येमुख्या श्च तस्त्रो व त्स्त तर्प स्त्राश्वा लंह
येए तं पुवा नं पतिवो ददा मि तेन कौ लेती श्वरथ प्रिये णा मा व श्वा त्रजन्तु षास्सं विदा नारा यस्मो षेणसमि षा
मदेम स्वाहे ति नम्यस्येन्तु मंत्र यते मयो मृ त्स्यिनु वाकशेषे ण स वसितां पयास षाय सं श्रप यित्वा ब्राह्मणा
भोजयेत ॥११॥ उर्ध्वमाग्रहायण्यास्तिस्रोष्टका अपरपक्षेषु तासां प्रथमायां शाकं जुहोति । इयमेव सा या
प्रथमा व्युच्छदंतरस्यां चरति प्रविष्टा । वधूर्जजान नवगज्जनित्री त्रय एनां महिमानः सचंतां स्वाहे त्यथ स्विष्ट
कृतो यस्यां वै वस्वतो यमः सर्वे देवाः समाहिताः । अष्टका सर्वतो मुखी सा मे कामान्ददातु मे । अकुस्त्याव
तादंतीन्नः पवमानो मासाश्चार्धमासाश्च नमस्ते सुमना सुखि स्वाहेति ॥१२॥ मध्यमायां मध्याव र्षे च मह
व्याहृतयश्च तस्त्राय नात षुरि स्ति च तस्त्रो नुद्दुत्य व पांजु क पाहा । वहवपां जातवेदः पितृभ्यो यत्रैतां वेत्थ सु
कृतस्य लोके । मेदसः कुल्या उप तान्स्रवंतु सत्याः संतु यजमानस्य कामाः स्वाहेति वा महाव्याहृतयश्च तस्त्रो
यनात षुरिति च तस्त्रो प्याहुतिः स्थाली पाको वदा नमि श्रो मंर्हि ताग्निर्योर्तर्हिता पृथिवीम होमा दि वा दिग्भ्य
श्च सर्वाभिरन्य मंतः पितुर्देधेमु ष्ये स्वाहा । अंतर्हिता महर्षि नवो होरा त्रैश्च संधिजाः । मासाश्चार्धमासाश्च
न्यमंतः पितुर्देधमुष्यै स्वाहा । यास्तिष्ठंति याः स्रवंति या दर्भाः परिस्रव्यीः । अद्भिः सर्वस्य भ...र्तृभिरन्य

कौ॰

दौ२ श्री १०

मंत्रः पितुर्दघेमुष्मै स्वाहा । यन्मेमाताप्रलुलुभेविचरंत्यपतिव्रता । रेतस्तन्मेपितावृक्तांमाभुरन्योपपद्यतामुष्मैस्वा
हेति वा महाव्याहृतीनां स्थाने च तस्मान्यत्र करणस्य पायसो वा चरुश्चाष्टकायां पिंडपितृयज्ञावृता ॥१३॥ उत्तमा
श्रा ३ पामष्टपांत्रुहोत्युच्छिष्टस्वातिरात्रमवसघः श्री छंदसामसहोतिपहृदष्टकेन मस्तेसुमनामुष्मैस्वाहेति गोपशुमज १४
पशुस्थालीपाको वाप्यवा गोर्ग्रासमाहरेदपि वारण्ये कक्षमुपादहेदेषा मेष्टकेति नत्वेव न कुर्वीत नत्वेव न कुर्वीत
॥१४॥ इति शांखायनगृह्यसूत्रे तृतीयोऽध्यायः ॥ ॥ मासि मासि पितृभ्यो दद्यात् ब्राह्मणान्वेदविदेयुग्मांस्त्र्यवरार्ध्यी श्रा
न्पितृवदुपवेश्यायुग्मानुदपात्राणि तिलैरवकीर्य सावेतत्त्वित्यनुदिश्य ब्राह्मणानां पाणिषु निनयेदत ऊर्ध्वम
श्रा ७ लंकृतान्संम्माग्नौकृत्वान्नं वासा[redacted]वेतत्त्वित्यनुदिश्य भोजयेद्भुंजानेषु महाव्याहृतीः सावित्रीं मधुवाती
तीयाः पितृदेवत्याः पावमानीश्च जपेद्भुक्तवत्सु पिंडार्द्धं घासुरस्वादेकपिंडान्पश्चिमेन तत्पत्नीनां किंचिदं तथा १५
पश्चाह्नणेभ्यः शेषं निवेदयेदग्नौकरणादि पिंडपितृयज्ञेन कल्पो व्याख्यातः ॥१॥ अथात एकोद्दिष्टमेकं प
15 वित्रमेकार्घ्यमेकपिंडं नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्न उपतिष्ठतामित्यक्षय्य
स्थाने भिरम्यतामिति विसर्गः संवत्सरमेवं प्रेते चतुर्थदिसगश्च ॥२॥ अथ सपिंडीकरणं संवत्सरे द्वादशाहे त्रिपक्षे
वा यदहर्वा वृद्धिरापद्येत चत्वार्युदपात्राणि सतिलगंधोदकानि कृत्वा त्रीणि पितृणामेकं प्रेतस्य प्रेतपात्रं

पित्पात्रे प्वासिंचति ये समानाइति द्वाभ्यामेवं पिंडमध्येत सपिंडीकरणं ॥ ३ ॥ अथात आभ्युदयिके मास
पमाणपक्षे पुण्याहमात्रयागं कृत्वा युग्मान्वेदविद उपवेश्य पूर्ववत् प्रदक्षिणमुपचारः पितृमंत्रवर्जं जप
ऋजवो दर्भाः पवैस्तिलार्थो दधिबदराक्षतमिश्राः पिंडा नांदीमुखान्पितृनावाहयिष्य इत्यावाहने नां
दीमुखाः पितरः प्रीयंतामित्यक्षय्यस्थाने नांदीमुखान्पितृन्वाचयिष्य इति वाचने संपन्नमिति तृप्तप्रश्ने
समानमन्यद्विहितमिति ॥ ४ ॥ अथोपाकरणमोषधीनां प्रादुर्भावे हस्तेन श्रवणेन वाक्षतस्यैंसक्तू
१६ नां धानानां दधिघृतमिश्राणां प्रत्यृचं जुहुयादिति हैक आहुः सूक्तानुवाकाद्याभिरिति वाध्या
पार्वद्याद्याभिरिति माण्डूकेयोऽथ हस्माह कौषीतकिरग्निमीळे पुरोहितमित्येकाकुभमकृस्तदब्रवीद्वा
वदेतच्छंकुने भद्रमावद गृणानाजमदग्निना धाममंते विश्वं भुवनमधिश्रितं गंतानो यज्ञं यज्ञियाः सुश
मियोयोनः स्वो अरणः प्रतिचक्ष्व विचक्ष्वाग्ने याहि मरुत्सखा पते राजश्रेष्ठं तं हविरिति हुत्वा स्तच्छंयो
राष्ट्रणीमह इत्येकाकुतशेषाद्धविः प्राश्नंति दधिक्राव्णो अकारिषमित्येतयाचमयो विपर्यस्य महाव्या
हृतीः सावित्री वेदादिप्रभृती निस्वस्त्ययनानि च जप्त्वाचार्यं स्वस्तिवाच्य तदपि भवत्ययातयामता ति०श्रं
हजानां सारस्वं छंदसां तथा ॥ इष्टं तत्सषयो पश्यन्नुपाकर्मतपो बलात् । तस्मात्तद्धर्मनित्येनात्मनो मंत्रसिद्ध

ेा उपाकर्म्मेति विद्यमित्याकुः कर्मणां सिद्धमिच्छता॥ उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं भवेत्। अष्टकासु त्वहोरात्र
मृत्वन्त्यासु च रात्रिषु॥५॥ माघस्य कृष्णप्रतिपद्यपराजितायां दिशि वहिः पर्धीकदेश उदुम्बरं जातवेदसं चित्रं दे
वानां नमो मित्रस्य सूर्यो नो दिवस्पातिति सोऽयं गिजापित्वा शासइत्या महाँ असीति प्रदक्षिणं प्रत्य चं प्र
तिदिशं प्रत्यस्य लोष्टान् वोढ्छंदांसि देवता अग्ना मेघ वतर्पयित्वा प्रतिपुरुषं प्रपितरं छंदांसि विश्राम पर्य्या
मा ५ ईसप्तमासानईष्टावाधीयीरन्नेदहोरात्रमुपरम्य प्राध्ययनं॥ ६॥ अथोपरममुत्पातेष्वाकालमन्ये ष्व
द्भुतेषु च दिघुक्तनपितृवषस्तु त्रिसंध्यमेकां श्राद्धभोजने दशाहमयस्य स्तकेपु च चतुर्दश्यमावास्ययोरष्ट
कासु च वासरे पुनम्यषुचाचार्ये वापरते दशाहं श्रु वा त्रिरात्रं तस्य वणि च प्रति यहे श्राद्ध वत्स ब्रह्मचारिणि
16 प्रेतमनुगत्वा पितृम्पश्च निधाय पिंडान्निशां संध्यां पवस्थितमिते शूद्र सन्निकर्षे सामशब्दे श्मशाने ग्रामा १६
रण्ये चौंतः शवे ग्रामे दर्शनीयादश्र्वलीयाद्नि षघ्राणेति वाते प्र प्रावर्षे मित्थ्यायां वीणाशब्दे चरप शि ४
स्यः शूद्रव त्सुनिवृक्षारोहणे वरारोहणे ष्युक्तं दत्वा स्वैनिग्गउच्छिष्टसंक्रमे देशश्मश्रु णिवापन आस्वादु नो
त्सादने स्नाने संवेशने भ्यंजने प्रेतस्पर्शिनि सतिकोदक्य योश्च शूद्रवदपि हितपाणिः सनायामर्भुजानो
श्रान्तेगोषु वातिक्रान्ते पधीयीरन्नेते पांयदिकिंचिदका मोत्पाती मवे त्साणनायस्यादित्यमी दिशित्वाधी

सू।।

धीतविघुस्त्तनपिनुवर्षवर्ज्जंकल्पेवषविदद्ईषष्ठेधुतदप्येतैर्न्नमापोमत्लफलंयच्चान्यच्छ्राद्धिकं
मवाप्नतिगत्द्याप्यनध्याय:पाल्पोस्याब्राह्मण:स्मृतइति॥७॥न्यायोपेतम्पश्चवर्त्तयेत्त्राङ्मुखोदङ्मुखासी
नश्चाचार्योदक्षिणतउदङ्मुखइतरोद्वौवाममपांसक्त्तपथावकाशंमोपविष्टासनोपविष्टोगुरुसमीपेने
कासनस्थोनप्रसारितपादोनबाहुभ्यांजानूपसंगृह्यनोपाश्रितशरीरोनोपस्थकृतपादेनपादकु
गरिकांकृत्वाधीहिभोऽइत्युक्त्वाचार्यउँकारंप्रचोदयेद्धीमितीतर:प्रतिपद्यतेतत्संततमधीयीता
धीत्योपसंगृह्यविरतास्मभोऽइत्युक्त्वायथार्थंविसृष्टंविरामस्त्ववदित्येकेनाधीयतोमंतरागच्छेन्ना
त्मानंविपरिहरेदधीयानोयद्विचेदोष:स्यात्त्रिरात्रमुपोष्याहोरात्रंवासावित्रीमभ्यावर्त्तयेद्यावच्छ
क्त्याब्राह्मणेभ्य:किंविदद्यादहोरात्रमुपरम्यप्राध्ययनं॥८॥स्नातउपस्पर्शनकालेवगाह्यदेवता
स्तर्पयति।अग्निस्तृप्यतु।वायुस्तृप्यतु।सूर्यस्तृप्यतु।विष्णुस्तृप्यतु।प्रजापतिस्तृप्यतु।विरूपा
क्षस्तृप्यतु।सहस्राक्षस्तृप्यतु।सोम:।ब्रह्मा।वेदा:।देवा:।ऋषय:।सर्वाणिचछन्दांसि।उँकार:।
वषट्कार:।महाव्याहृतय:।सावित्री।यज्ञा:।द्यावापृथिवी।नक्षत्राणि।अंतरिक्षं।अहोरात्राणि।सं
ख्या।संध्या।समुद्रा:।नद्य:।गिरय:।क्षेत्रौषधिवनस्पतिगंधर्वाप्सरस:।नागा:।वयांसि।सिद्धा:।

साध्याः विप्राः यक्षाः । रक्षांसि । भूतान्येवमंतानि तृप्यंतु । ऋतिं तर्पयामि । स्मृतिं तर्पयामि । धृतिं तर्पयामि । रतिं
तर्पयामि । गतिं तर्पयामि । मतिं तर्पयामि । श्रद्धामेधे धारणाञ्च । गोब्राह्मणं स्थावरजंगमानि सर्वभूतानि
तर्पयामीति यज्ञोपवीती ॥ ९ ॥ अथ प्राचीनावीती । पित्र्यां दिशमीक्षमाणः । शतर्चिनः । माध्यमाः । गृत्स
मदः । विश्वामित्रः । जमदग्निः । वामदेवः । अत्रिः । भरद्वाजः । वसिष्ठः । प्रगाथाः । पावमानाः । क्षुद्रसूक्तमहा
सूक्ताः । सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यगार्ग्यबभ्रुबाभ्रव्यमंडुमांडव्याः । वाचक्नवी । वडवाप्रा
तिथेयी । सुलभा । मैत्रेयी । कहोलं । कौषीतकिं । महाकौषीतकिं । सुयज्ञं । शांखायनं । आश्वलायनं । ऐ
तरेयं । महैतरेयं । भारद्वाजं । जातूकर्ण्यं । पैंग्यं । महापैंग्यं । बाष्कलं । गार्ग्यं । शाकल्यं । मांडूकेयं । महादम
त्रं । औदवाहिं । महौदवाहिं । सौयामिं । शौनकिं । शाकपूणिं । गौतमिं । ये चान्ये आचार्यास्ते सर्वे तृप्यंत्वि ९
ति । प्रति पुरुषं पितरः पितृवंशस्तृप्यतु मातृवंशस्तृप्यतु ॥ १० ॥ न नग्नां स्त्रियमीक्षेतान्यत्र मैथुना
न्नादित्यसंधिवेलयोरनाहमकार्यका [illegible] व्रतस्य शिनं स्पृतिकोदकपाम्यां न्नसंवदेदेतस्मोद्धृतनेजां
सिन भुंजीत न पातयामेः कार्यं कुपत्न्या सह भुंजीत न शेषं पितृदेवतातिथिभृत्यानां शेषं भुंजीतोच्छि
शीलमयाचितप्रतिग्रहः साधुभ्यो याचितो वायाजनं वृत्तिः सर्वं हिर्वं गारीयासंसिध्यमानायां वैश्यवृ

x स्नामीनाग्नि वाशयीतन द्वीपरस्ताज्जेनम्रमावनंतर्हितायामासीतनित्योदकी यज्ञोपवीतीन विरहेदा १ शोध: x
त्रिर्नाग्रमत्तः पितृदैवतकार्ये द्वतोस्वदोंचायमन्यत्रनियोगादनुज्ञातोवा। १ शाच्च हरहराचापयामिवाद
तृ यद्गुरुम्पश्चसमेत्य स्वात्रश्रोत्रियस्यवाप्यप्रत्यप्रीत्या श्रोत्रियस्यासावहंभो २ इत्यात्मनोनामादिश्य ब्रह्मस्य
पालीअसा। ३ इत्यस्यपालीसंगृह्याशिषमाशास्तेनाहृतोयज्ञं गच्छेद्धमाञ्चिजुगुप्सेतानजनसमवायं गच्छे
न्नोपयुदिशेत्समेत्यानाक्रोशकोपिशुनः कुलंकुलोनेतिहतिः स्यान्नैकश्चरेन्ननग्नोमाब्धिपहितपाणि
र्देवायतनानि प्रदक्षिणंनधावेन्ननिष्ठीवेन्नकंडूयेन्मत्रपुरीषनावेक्षेतावगुंठ्यासीतनानंतर्हितायांभू
म्यकवस्त्रोयज्ञोपवीतंकर्णेकृत्वामादित्यमभिमुखोनजघनेनाहरुदङ्मुखोनक्तंदक्षिणामुखोनचाप्सु
म्लेष्मानचसमीपेनहक्षमेरोहेन्नकूपमवेक्षेतनधुवनंगच्छेन्नवेवतुश्मशानंसवस्त्रोहरहराम्लवेताप्लुत्या
घुदकान्यद्वस्त्रमाच्छादयेत ॥१२॥ रोहिण्यां कृषिकर्माणि कारयेत्पुरस्तात्कर्मणां प्राच्यां क्षेत्रमर्यादायां
द्यावापृथिवीयंबलिं हरेद्द्यावापृथिवीपयवनिमो द्यावापृथिवीभ्यामिति चोपस्थानं प्रथमप्रयोगे सीर
स्य ब्राह्मणः सीरस्य शेचुनं नः फालाइत्येतामनुकृषन्क्षेत्रस्यपतिनेति प्रदक्षिणं प्रत्यृचं प्रतिदिशमुपस्था पु
नं ॥२३॥ उदकं तरिष्यन्स्वस्त्ययनं कुर्यात्तु उदकाञ्जलिं स्त्रीन प्रजुहोति समुद्रायवैणवेनमोवरुणाय धर्मपत
यकोनमोनमः सर्वाभ्यो नदीभ्यः सर्वासां पितृभ्यो विश्वकर्मणादत्तं हवि र्जुषंतामिति जपित्वा प्रतीपं स्नवंतीभ्य

ऽग्नीयं स्थापयत्यपरस्मिन्नग्नावुपशंके दास्ति संसक्तं जपेत् समुद्रज्येष्ठा इत्येतत्सूक्तं ॥१४॥ अथ श्रवणाकर्म विष्णौ श्रावण्यां पौर्णमास्यामक्षत
सक्तूनां स्थालीपाकस्य वा जुहोति विष्णवे स्वाहा श्रवणाय स्वाहा श्रावण्यै पौर्णमास्यै स्वाहा वर्षाभ्यः स्वाहेति गृह्यमग्निं वा
घृतमुपसमाधाय पलाशानक्षतसक्तून् अथ सर्पेभ्यो बलिं निनीय जुहोति दिव्यानां सर्पाणामधिपतये स्वाहा दिव्येभ्यः सर्वेभ्यः
स्वाहेत्युत्तरेणाग्निं प्रागग्रेषु नवेषु कुशेषूदकुम्भं निनयं प्रतिष्ठाप्य दिव्यानां सर्पाणामधिपतिरवनेनिक्तां दिव्याः सर्पा
अवनेनिजन्तामित्यपो निनयति दिव्यानां सर्पाणामधिपतिः प्रलिखतां दिव्याः सर्पाः प्रलिखन्तामिति फलेन च
लपति दिव्यानां सर्पाणामधिपतिराबध्नीतां दिव्याः सर्पा आबध्नतामिति सुमनस उपहरति दिव्यानां सर्पा
णामधिपतिराच्छादयतां दिव्याः सर्पा आच्छादयन्तामिति सूत्रतन्तुमुपहरति दिव्यानां सर्पाणामधिपतिरा
क्तां दिव्याः सर्पा आञ्जतामिति कुशतरुणेनोपघातमाञ्जनस्य करोति दिव्यानां सर्पाणामधिपतिरीक्षतां दि १८
व्याः सर्पा ईक्षन्तामित्यादर्शनेक्षयति दिव्यानां सर्पाणामधिपतय एष ते बलिः दिव्याः सर्पा एष वो बलिरिति मु
बलिमुपहरत्येवमान्तरिक्षाणां दिश्यानां पार्थिवानामिति त्रिस्त्रिरूर्ध्वेस्तरामुच्चैस्तरां हर्वेणीचैस्तरां नीचैस्त
रामुत्तमेवमहरहरक्षतसक्तूनां दर्व्योपघातमा प्रत्यवरोहणाद्रात्रौ रात्रौ वा व्यतः सोदकं बलिं हरेद्
चैनमुपसादयेद् घटपक्वसः सक्तसर्गः सुत्रामाणमिति शय्यामारोहेत् ॥१५॥ आश्वयुज्यां पौर्णमास्यामेन्द्रः पाय
प्रलिम्पतां दिव्याः सर्पाः प्रलिम्पन्तामिति वर्णकस्य मात्रां निनयति दिव्यानां सर्पाणामधिपति

18

सोश्विभ्यां स्वाहाश्वयुग्भ्यां स्वाहाश्वयुज्यै पौर्णमास्यै स्वाहा पशुपतये स्वाहा पिंगलाय स्वाहेत्याज्यस्य हुत्वा पृषात
कस्य गावो अग्मन्नित्येतेन सूक्तेन वत्सांश्च तु कुर्यान्मातृभिर्वत्सांसंसृजंति तां रात्रीमथ ब्राह्मणभोजनं ॥१६॥ आग्रहाय
ण्यां प्रत्यवरोहणं रोहिण्यां प्रोष्ठपदासु वा प्रातः शमीपलाशमधुकबीकापामार्गगणं शिरीषोदुंबरकुशतरुणबदरी
गणं च हस्तमुष्टिमादाय सीतालोष्टं चोदपात्रं वधायमहाव्याहृतीः सावित्रीं चोक्त्वापनः शोशुचदघमित्येते
न सूक्तेन तस्मिन्निमज्य निमज्य प्रदक्षिणं शरणेभ्यः पाप्मानं हत्वान्तरतो निनाय मधुपर्को दक्षिणा ॥१७॥ ग्रीष्मो ६४
हेमंत उत वा वसंतः शरद्वर्षाः सुवितन्नो अस्तु तेषामृतूनां शतशारदानां निवात एषामभये स्याम स्वाहा ॥ अ
पश्वेतं पदा जहि पूर्वेण चापरेण च सप्त च वारुणीरिमाः सर्वाश्च राजबांधवैः स्वाहा ॥ श्वेताय वैदर्व्याय स्वा
हा विदार्व्याय स्वाहा तक्षकाय वैशालेयाय स्वाहा विशालाय स्वाहेत्याज्यस्य हुत्वा ॥ सुहेमंतः सुवसंतः सुग्री
ष्म प्रतिधीयतां सुवर्षाः संतु नो वर्षाः शरदः शं भवंतु न इति शं नो मित्र इति पलाशशाखया विमृज्य समुद्रा
दूर्मिरित्यनुपूर्वं स्योना पृथिवि भवेति संस्तरमास्तीर्य ज्येष्ठदक्षिणाः पार्श्वैः संविशंति प्रतितिष्ठन्ति प्रतितिष्ठा
मि क्षत्र इति दक्षिणैः प्रत्यश्वेषु प्रतितिष्ठामि गोष्विति सव्यैः प्रति पशुषु प्रतितिष्ठामि पुष्टाविति दक्षिणैः प्र
ति प्रजायां प्रतितिष्ठाम्यन्न इति सव्यैर्वेदी इंगी वइत्युत्थानं संस्तरे तां रात्रीं शेरते यथासुखमत ऊर्ध्वं ॥१८॥ चै

त्र्यांपौर्णमास्यां कर्कंधुपर्णानि मिथुनानां च यथोपपादं पिबस्य हुत्वैं द्राग्मस्तुं द्विलोरोद्राग्मलुकालोकृतो नक्षत्राण्य
वा हुतयश्चलोकृतो नक्षत्राण्यन्वा हुतयश्च ॥ १९ ॥ इति चतुर्थोध्यायः ॥ अथ व्रवस्युना मनु[illegible]ल्पाः समिधि वाग्निं
समारोहयत्येवं हि मे प्राणानारोहेति सकृत्सकृन्मंत्रेण द्विर्द्विस्तूष्णीमयं ते योनिरित्येवारणी वृत्ति तपति समि
धं वाः नस्तमिते च मंथनं वैश्वदेवकाले चोपलिप्त उद्धृतावोक्षिते लौकिकमग्निमाहृत्योपावरोहेत्युपावरोहणमं
त्रेणाग्नौ सर्वप्रायश्चित्ताहुती हुत्वा पाहि नो अग्न एनसे स्वाहा पाहि नो विश्ववेदसे स्वाहा यज्ञं पाहि विभावसो स्वा
हा पाहि शतक्रतो स्वाहेति व्रतहोमानुपोष्याज्यस्य हुत्वा समग्ने व्रतपा इति ।१। अथ पुष्करिणीकूपतडागमानां
19 शुद्धपक्षे पुण्ये वा तिथ्यो पयसा यवमयं चरुं श्रपयित्वा त्वं नो अग्न इति द्वाभ्यामवतेहेल इमं मे वरुण उदुत्तमं वरुण १९
मां धियं शिक्षमाणस्य गृह्णा पगृह्णो मया मरुता खरो निखरो निक्रामः सपत्नहा वरुण इति वारुण्यादि क्रमं[illegible]तिथ्र
दक्षिणां जुहुयान्मध्ये पयसा जुहोति विश्वतश्चक्षुरिदं विष्णुर्यन्निं चेदमिति मंत्रस्तथा पिता धेनुं दक्षिणा वस्त्रयुग्मं वा अपयि३
नो ब्राह्मण भोजनं ॥ २ ॥ अथारामेग्निमुपसमाधाय स्थालीपाकं [illegible]हुत्वा विष्णवे स्वाहेंद्राग्निभ्यां स्वाहा विश्वकर्मणे
स्वाहेति या ओषधी इति त्रयस्त्रिंशं पंचाहुतीर्जुहुयात् वनस्पते शतवल्शा इत्यग्निमभिमंत्र्याहिरण्यं दक्षिणा ॥ ३ ॥ यदि पात्रेणास्त
हुतो न्यतरः [illegible]स्ततश्चरुं स्त्र ये वैश्वानराय स्वाहाग्नये तंतुमते स्वाहेति होमातिक्रमे सायं दोषा वस्तर्नमः स्वाहा प्रातः प्रा

निःसरो

तदेभ्यस्तर्नमः स्वाहेति यावंतो होमास्तावंतो कृत्वा सर्वं विद्धोमः ।४। कपोतोलूकाभ्यामुपवेशने देवाः कपोत इति प्र
त्यचं जुहुयाद् दुःस्वप्नदर्शने वाविदृष्टदर्शने निशायां काकशब्दे क्रांते च एषु चाद्भुतेषु च पयसा चरुं श्रपयित्वा सरूपव
त्सायां गोः पयसि नवे वा तु रुद्राया रात्री सूक्तेन प्रत्यृचं जुहुयाद् हुतशेषं महाव्याहृतिभिः प्राश्य यं मद्रं कर्णाभिरिति कर्णो
शतमि नुशरदो अंति देवा इत्यात्मानमभिमंत्र्य आलंभः किंचिद् घोरं व्याघो समुत्थित इमा रुद्राय तव
से कपर्दिन इति प्रत्यृचं गा वे धुकं चरुं जुहुयात् ।५। अहूतसोमं तोन्नयने चेन्न जायेता कृतजातकर्म मासी नतोति
कं ते दशाह उत्संगमातुः कुमारं स्थापयित्वा महाव्याहृतिभिर्हुत्वा सर्वं विद्धोमः ।६। स्थूलणा विरोहणे स्थालीपाकं श्रपयित्वा
याविश्वा जनयत् कृवरीणि पिशंगरूपः सुभरो वयोधा इति द्वाभ्यां चरुं जुहुयाद् यदि वर्णीता चरुरा ज्यस्थाल्यन्य
दपि मन्मयं भिन्नं स्रवे वा सर्वप्रायश्चित्ताहुतीर्हुत्वा यस्तते चिदितित्वचेनाभिमन्नमनुमंत्र पतेय घस माघ्न होमपवित्रेन
श्यते सर्वप्रायश्चित्तं हुत्वा पुष्व ग इति पुनरुत्पादयेत् ।७। अथ सपिंडीकरणं चत्वारि उदपात्राणि हरयित्वा पितुः
प्रभृतीति तदृत्विंडान् कल्पयित्वा ये समानाः समनसः पितरो यमराज्ये तेषां लोकं स्वधा नमो यज्ञो देवेषु कल्प
तां ये समानाः समनसो जीवा जीवेषु मामकाः तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः समानो मंत्र इति द्वा
भ्यामाघं पिंडं त्रिषु विभजेत् तथैवार्घपात्राण्येवं मातुः प्रतितु मार्यायाः सर्वमारि एपा [illegible]भिः पिंडैः प्रक्षिप्य ।८। य

दि गृहे मधु कामधु कुर्वंत्युदुंबरीः समिधो दशशतं दधिमधुघृताक्ता मानो महांतमिति द्वाभ्यां जुहुयात् छंदइंद्राग्नी इति
च सूक्तं जपेत् सर्वेषु च कर्मसु प्रतिकृतादिषु प्रादेशमात्रीः पालाशीः समिधः सप्तदश कृत्वा पश्चात्स्कंदय ग्रहणं दर्शपूर्ण
मासयोः पंचदश मध्यावर्वेष्टकेति तिस्रो वा भवंति पितृभ्यां यथज्ञवद्धोमः ॥ ८ ॥ यदि गृहे वल्मीकसंभूतिर्गृहात्समी गो
य त्रिरात्रमुपोष्य महाशांतिं कुर्यान्महाशांतिं कुर्यात् ॥ १० ॥ इति गृह्यसूत्रे पंचमोध्यायः ॥ अथातो ब्राह्मणं ब्रह्म
ब्रह्मयोनिमिंद्रं प्रजापतिं वसिष्ठं वामदेवं कहोलं कौषीतकिं महाकौषीतकिं सुयज्ञं शांखायनमाश्वलायनमैतरेय
महैतरेयं कात्यायनं शाट्यायनं शाकल्यं बभ्रुं बाभ्रव्यं मंडुं मांडव्यं सवनिवह्नवं चायन्निमस्य स्वाध्यायारंभक
स्य नियमानुदाहरिष्यामो होरात्रं ब्रह्मचर्यमुपेत्याचार्योऽमांसाश्यामपिशितं चंडालं सूतिकां रजस्वलां तेदं
20 न्यपहस्तकृदशक्तिन्यनध्यापकानि शवरूपाणां च यान्यास्येन प्रविशेयुर्वंति [redacted] कर्म मांसाशने श्राद्ध २०
सूतकभोजनेषु ग्रामाध्ययनानंतर्हितान्यहानि त्रिरात्रान वल्लभः परामिमृष्ट उपपर्वणामहूडन्नराद्यनिचा
ग्निविघुक्तन पितुर्वर्षा महामह्राद्भुमविद्वत्वा ते च शार्कराकर्दमा यावत्कालं ॥ १ ॥ ऊर्ध्वमाषाढ्याश्चतुरो मासा
न्नाधीयीतात्यंतं शक्वर इति नियमाः प्राग्ज्योतिषमपराजितायां दिशि पुण्यमुपगम्य देशमनुदित उदकग्रहणं
ग्रं रल प्रवेशा स्वांजनगंधिमित्सेनयत्नामंडलंतुवा गृहात्मृदगृहारं वा जनानीर्यमसं प्रमाणमसंबाधर्मवामदेव्यमु
कूलभ्रमस्य

मास्तितिमोजस्तेजोयशोबलंब्रह्मवर्च्चसंकीर्त्तिमायुःप्रजांपशून्नमोनमस्कृतावर्द्धयंतुद्विषुतादुरूपपुत्रान्यूनाधि-
काद्यसर्वस्मात्स्वस्तिदेवऋषिभ्यश्चब्रह्मसत्यंचपातुमामितिब्रह्मसत्यंचपातुमामिति॥ इतिशांखायनगृह्यसूत्रे
षष्ठोध्यायः॥समाप्तः॥ शिवमस्तुसर्वजगतः॥ [illegible]

२२ गृह्यसूत्रशांखायन॥श्रीसरस्वत्यैनमः॥पुस्तकमिदंदवेरामदेवगार्हपत्यस्य॥श्रीगणेशायनमः॥छ॥श्री॥ छ॥श्री॥

याहृशांखायनगृह्यसूत्रेष्वध्याद्पुस्तकमिदंदवेरामदेवगार्हपत्यस्य॥शुभंभवतु॥श्री॥छ॥श्री॥छ॥

॥पुस्तकमिदंदवेआनंदरामस्य॥

॥याहृशंपुस्तकंदृष्ट्वाताहृशंलिखितंमया॥यदिशुद्धमशुद्धंवाममदोषोनदीयते॥रामदेवस्येदंपुस्तकं॥ २२

॥दवेआनंदराम॥

॥दवेरामदेवस्येदंपुस्तकं॥

॥दवेश्रानंदरामस्येदंपुस्तकं॥

॥रामदेवगार्हपत्यस्येदंपुस्तकं॥

द० रामदेव गार्हपत्य ग्रन्थ स्तुत

दवेरामदेव
गार्हपत्य॥

पत्रिका:
२६०

॥दवेश्रानंदरामराम॥

॥देवस्येदंपुस्तकं॥